तुर्वसुवंश्यमरुत्तकन्यायां सम्मतायां संवर्त्तर्षेः जाते २नृपभेदे तत्कथा हरिवं० ३२अ० । तुर्वसुवंशवर्णने यथा “अन्तस्त्वाविक्षितो राजा मरुत्तः कथितस्तव । अनपत्योऽभवद्राजा यज्वा विपुलदक्षिणः । दुहिता सम्मता नाम तस्यासीत् पृथिवीपतेः ॥ दक्षिणार्थं तु सा दत्ता संवर्त्ताय महात्मने । दुष्मन्तं पौरवञ्चापि लेभे पुत्रमकल्मषम् । एवं ययातेः शापेन जरासंक्रमणे तदा । पौरवं तुर्वसोर्वंशः प्रविवेश नृपोत्तम ॥ दुष्मन्तस्य तु दायादः करुत्यामः प्रजेश्वरः” । तस्यापत्यम् इञ् दौष्मन्ति भरते करुत्यामे च नृपभेदे

**दु(दुः)स्थ** त्रि० दुर्+स्था—क वा विसर्गलोपः । दुःखेन स्थिते “कल्पान्तदुःस्था वसुधा तथोहे” भट्टिः १कुक्कुटे २कुक्कुरे च पुंस्त्री शब्दार्थचि० स्त्रियां जातित्वात् ङीष् ।

**दु(दुः)स्पृष्ट** न० दुष्टं स्पृष्टम् प्रा०स० वा विसर्गलोपः । जिह्वाग्रादिना वर्णोच्चारणस्थानस्य ईषत्स्पर्शरूपे चाभ्यन्तरे वर्णोच्चारणप्रयत्ने तदस्यास्ति कारणत्वेन अच् । २तेनोच्चार्यवर्णे च “अचोऽस्पृष्टायणस्त्वीषत् नेमस्पृष्टाः शलस्तथा” “दुस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च” पाणिनिशिक्षा । लृकारस्य लकारादित्वेन दुस्पृष्टत्वमिति व्याकरे स्थितम् । [अदुहत् । दुद्रोह दुहितः ।

**दुह** वधे भ्वा०पर०सक०सेट् । दोहति दुहेत् अदोहीत्

**दुह** दोहने अन्तःस्थितद्रवद्रव्यस्याकर्षणेन बहिर्निस्सारणे उभ०अदा०द्विक०अनिट् । दोग्धि दुग्धे दुह्यात् धुक्षीष्ट अधोक् अदुग्ध । अधुक्षत् अदुग्ध अधुक्षन्त अधुक्षावहि अदुह्वहि दुदोह । दुदोहिथ दुदुहिव दुदुहे । दुह्यात् धोक्ष्यति ते । दोग्धव्यं दुह्यं दोह्यम् । दोग्धा दोहनं दुग्धम् । दोग्धुम् दुग्ध्वा संदुह्य । “यं सर्वशैलाः परिकल्प्य वत्सं मेरौ स्थिते दोग्धरि दोहदक्षे । भास्वन्ति रत्नानि महौषधीश्च पृथूपदिष्टां दुदुहुर्धरित्रीम्” कुमा० “यः पयो दोग्धि पाषाणम्” “पयोघटोध्नीरपि गा दुहन्ति” भट्टिः एककर्मविवक्षायाम् अस्यैककर्मकत्वमपि “दुदोह यज्ञसिद्ध्यर्थं ऋग्यजुःसामलक्षणम्” मनुः “दुग्ध्वा पयः पत्रपुटे मदीयम्” रघुः । निःसारणमात्रे च “दुग्धेऽस्मै सर्वं कामं यो वाचो दोहः” छा०उ० “न कर्मफलमाप्नोति योऽधर्मं दोग्धुमिच्छति” भा०व० ११६५श्लो० “यत्र धर्मदुघा भूमिः सर्वकामदुघा सती । दोग्धि स्माभीप्सितानर्थान् यजमानस्य सर्वदा” भाग० ४।१६।७ दुघुक्षति । अस्य गौणकर्मणि लकारादि “प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः” इत्युक्तेः । “तेषु तेषु तु पात्रेषु दुह्यमाना वसुन्धरा” हरिवं० ८१ श्लो० अस्य कर्मकर्त्तरि गौणकर्मणः कर्तृत्वविवक्षायाम् केवलं तङ् न यक् । गौःपयो दुग्धे । वा चिण् । अदोहि अधुक्षत अदुग्ध सि०कौ०

**दुहादि** पु० गौणे कर्मणि लकारविधानार्थे धातुसमूहे स च “दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमन्थ्मुषाम् । कर्मयुक् स्यादकथितं तथा स्यात् नीहृकृष्वहाम्” व्या० कारिकायां पठितः दुहप्रभृतिः मुषपर्यन्तः धातुसंघः । अस्य कस्यापि कारकसंज्ञाऽप्राप्तौ प्रधानकर्मोपयोगिनः कर्मसंज्ञा “दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासि गुणेन च यत् सचते तदकीर्त्तितमाचरितं कविना” महाभाष्यकृतोक्तेः । [उदा० ।

**दुहि** पु० दुह—धातुनिर्देशे इक् । दुहधातौ दुहादिशब्दे

**दुहितुःपति** पु० ६त० षष्ठ्या वा अलुक् स० । जामातरि पक्षे लुक् । दुहितृपतिरप्यत्र ।

**दुहितृ** स्त्री दुह—दह वा तृच् । “नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ” उणा० नि० । स्वजन्यस्त्रियां स्त्रीसन्ततौ ऋदन्तत्वेऽपि स्वस्रादित्वात् न ङीप् । तृजन्तत्वाभावात् सर्वनामस्थाने परे न वृद्धिः दुहितरौ दुहितरः इत्यादि प्रियादिषु पाठात् अस्मिन् शब्दे परे पूर्वस्थितस्य उक्तपुंस्कस्त्रीलिङ्गस्य विशेषणशब्दस्य न पुंवत् जाता दुहितृकः । “मातुर्दुहितरः शेषमृणात्ताभ्य ऋतेऽन्वयः” याज्ञ० । “मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत्” मनुः । कन्याशब्देऽनुक्तं तद्दानपात्रफलादिकमधिकमुच्यते ।

“कृत्वा परीक्षां कान्तस्य वृणोति कामिनी वरम् । वराय गुणहीनाय वृद्धाय ज्ञानिने तथा । दरिद्राय च मूर्खाय रोगिणे कुत्सिताय च । अत्यन्तकोपयुक्ताय चात्यन्तदुर्मुखाय च । जडाय चैव मूकाय क्लीवतुल्याय पापिने । ब्रह्महत्यां लभेत् सोऽपि यः स्वकन्यां ददाति च । शान्ताय गुणिने चैव यूने च विदुषेऽपि च । वैष्णवाय सुतां दत्त्वा दशवापीफलं लभेत्” । कन्याविक्रये दोषो यथा “यः कन्यापालनं कृत्वा करोति विक्रयं यदि । विपत्तौ धनलोभेन कुम्भीपाकं स गच्छति । कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी । कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश । मृतस्य व्याधयोनौ च स लभेज्जन्म निश्चितम् । विक्रीणीत